CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13
Coll. No. 692

Title Tulāpuruṣadāna-
vidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 692 Subject: Puranic lit.

Title: Tulāpuruṣadānavidhi

Author: — Scribe: —

Date of the work: - Date of the Ms.: -

Place of the work: - Place of the Ms.: -

Size: 10.8 by 4.8 Extent: 18 foll.

Language: Sanskrit Script: Devanagari

Remarks: —

॥ दिवस्समानमित्यस्य कश्यप० ऋ० जगती० छं० सूर्यो० दे
विभ्राडि० तं
शकधूममित्यस्य ऋ० ऋ० अनु० छं० सोमो० शकधूमं
त्वयामन्यो इति० ब्रह्मा० ऋ० त्रि० मन्यु० त्वयामन्यो
यज्जाग्रत इति वि० ऋ० पङ्क्ति० छं० बुधो० ता
बृहस्पतेऽर्घ्यः परिपात्विति ब्रह्मा० ऋ० बृह० ता
हिरण्यवर्णा इति अथर्व० ऋ० त्रि० छं० शुक्रो० ता शुक्रोऽसि
सहस्रबाहु इति नारायण० ऋ० शी० अनुष्टु० छं० शनि० ता
दिव्यं चित्रमिति कौशिक० ऋ० त्रि० छं० राहु० ता
यस्ते हरि धुरि इति अथर्व० ऋ० त्रि० छं० केतु० ता
मानो विदन्निति ब्रह्मा० ऋ० अ० छं० रुद्रो० ता
आपो हि ष्ठेति सिंधु० ऋ० गायत्री० छं० उमा० ता
अग्नीरिवेति ब्रह्मा० ऋ० त्रिष्टु० छं० स्कंदो० ता
उत विष्णुरित्यथर्वा० ऋ० गायत्री० छं० विष्णुर्दे० ता
ब्रह्मजज्ञानमित्यथर्वा० ऋ० त्रिष्टु० छं० ब्रह्म० देवता

॥ अथाथर्वणानामग्निस्थापनादि विधिः॥ तत्रादौ बर्हिर्ध्रुवनायशस्त्रादानमंत्राः। ॐ अव्यसश्च व्यचसश्च विलं विष्यामि मा
यया। ताभ्यामुद्धृत्य वेदीमथ कर्माणि कृण्महे। प्रयच्छ पर्शुं त्वरया हरौषधिमहिंसंतः। अनेन मंत्रेण दात्रं गृहीत्वा। ओषधीर्दत्त्विप
र्वाणीति बर्हिः रुपरि पर्वाणां लुनाति। ततो बर्हिः पंचेध्मदारूणि वसनं च। ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमंतः शिशिरो वसंतः। ऋत
वस्ते विहिता हायनीरहोरात्रे पृथिवी नो दुहातामित्यनेन ~~[illegible]~~ भूमे रुपस्थापनं कृत्वा। प्रादेशमात्रां शमीसमिधं विमायानुम
त्रयेदनेन मंत्रेण मिमिस्व पयस्वतीं घृताचीं देवानां धेनुरनपस्पृगेषा। इंद्रः सोमं पिबतु क्षेमो अस्त्वग्निः प्रस्तौतु विमृधो
नुदस्वेति। ततस्तया समिधा बद्धामित्यादि वेदिं कल्पयेत्। अत्रायं वेदिकल्पनाप्रकारः। कुंडात्प्राच्यां दक्षिणोत्तरयो
श्च त्रिदिशं समिधोर्द्धमर्द्धं गृहीत्वा पश्चिमायां च सार्द्धं समिद्द्वयमितां भूमीं गृहीत्वा दीर्घचतुरस्रां महावे[illegible] २
दिं परिकल्पयेत्। सा च प्राक्पश्चिमयोः समित्षद्कायतां दक्षिणोत्तरयोश्च समिच्चतुष्टायता कल्पिता भवति।

तत्र महावेदीपश्चिमरेखामध्यात् पूर्वतः समित्त्रयमितां भूमिं त्यक्त्वा प्राचीरेखामध्यात्पश्चिमतः। समिन्मा
त्रं भूमिं त्यक्त्वा तथैव दक्षिणरेखायाः उत्तरे च समिन्मात्रां भूमिं त्यक्त्वा उत्तररेखायाः दक्षिणतः समिन्मात्रां भू
मिं त्यक्त्वा कुंडमध्ये समिद्द्वयपरिमितां समचतुरस्रामुत्तरवेदिं कल्पयेत्। विधिकुंडाभ्यंतरे परितः समिदर्द्धत्यागेन संपद्यते। एवमुत्तरवे
दिं परिकल्प्य महावेद्या ईशानकोणादारभ्य [illegible] समंतात् सर्वतो वालुकया रेखां कुर्यात्। ततो बृहस्पते परिगृहाण वेदिं सुगा वो देवाः
सदनानि संतु अस्यां बर्हिः प्रथतां साध्वंतरहिंस्त्वा न पृथिवी देवी देव्यास्त्विति वेदिं परिगृह्णाति। त्रीन्वारान्वेदिरेखापरितो नुमंत्र
णपरिग्रहः। ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमंतः शिशिरो वसंतः। ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहातां। यत्ते भूमे विखना
मि क्षिप्रं तदपि रोहतु। मा ते मर्म विमृग्वरि मा ते हृदयमर्पिपमिति खनिता। यत्त्वा खनेतन्न आपुरयाति प्रजापतिः प्रथमजा ऋ
तस्येत्यनेन खनितस्थपूरणं कुर्यात्। त्वमस्यावपनी जनानामदितिः कामदुघा पप्रथाना इति वालुकाभिस्तां पूरयित्वा पुनः प्र
वोक्षिप्रकारेण समिन्मानपूर्वकं चतुरस्रं अग्निस्थापनार्थं उत्तरवेदिं गृहीत्वा तत्र बृहस्पते परिगृहाणेति प्रवोक्षितेन मंत्रेण वालु

कानिधायस्त्र्असंबाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु । नानावीर्या ओषधीर्या बिभर्त्ति पृथिवी नः प्रथताग
ध्यतां नः इति मंत्रेण वालुकाः प्रथयित्वा यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः । या बिभर्ति बहुधा प्र
णौ देतन्नानो भूमिर्गोष्वप्यन्ने दधातु । इति मंत्रेण प्रथितां निर्वालुकां निर्वेदिं चतुरस्रां कृत्वा देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बा
हुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिषा परिगृह्णामीति हिरण्यासुद्धेरवनमाधनं गृहीत्वा । इंद्रः सीतां निगृह्णातु तां पूषाभि
रक्षतु । सा नः पयस्वती दुहामुत्तरामुत्तरां समामिति । प्रागग्रां रेखां कृत्वा तस्यां व्रीहियवावोप्य वर्षेण भूमिः पृथिवी वृताऽसा वृता
नो दधातु भद्रया । प्रिये धामनि धामनि इत्यनेनाद्भिः संप्रोक्ष्य । यस्यामन्नं व्रीहियवौ यस्या इमाः पंच कृष्टयः । भूम्यै पर्जन्य
पत्न्यै नमोऽस्तु वर्षमेधसे इति भूमिं नमस्कृत्य त्वामग्ने भृगवो नयंतामांगिरसः सदनं श्रेयादि । विश्वकर्मा पुरः मनु प्रजानन् भद्रय २
यामनु ते दिशानः श्रियं यथामनु ते दिशानः स्वस्ति पंथामनु ते दिशानः इति अग्निं प्रणीय । भद्रोऽत्र वस्त्र... स्त्यो भवेति यात्रस्थ व्रीहि
यवौ प्रत्तिप्य विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशिनी । वैश्वानरं बिभ्रती भूमिरग्निमिंद्रऋषभा द्रविणो

नो दधातु इति उत्तरतः यामग्निं प्रतिष्ठाप्य नत्र ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेधानास्तन्वं पुषेम । मह्यं नमंतां प्रदिशश्चतस्रस्त्वया
ध्यक्षेण पृतना जयेमेति तिस्रः समिधो कृत्वा । कुशौ पवित्रे कृत्वा ताभ्यां मिध्मस्य त्रिः प्रोक्षणं कुर्यात् तत्र विष्णोर्मनसा पूतमस्
इति प्रथमं प्रोक्षणं विष्णोर्मनसा पूतमसीति द्वितीयं । देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण सहस्रधारेण सुप्वा सुनामीति तृती
यं कृत्वा चतुर्थं ततः अग्नये त्वा जुष्टं प्रोक्षामीति इध्मं समादाय अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्याग्निरश्मसु अग्निरंतः पुरु
षेषु गोष्वश्वेष्वग्नयः । अग्निर्दिव आतपत्यग्नेर्देवस्योर्वंतरिक्षं । अग्निं मर्तास इंधते हव्यवाहं घृतप्रियं । अग्निवासाः पृथि
व्यसितज्ञुस्त्विषिमंतं संशितं मा कृणोतु । भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतं । भूम्यां मनुष्या जीवंति स्वधयान्नेन मर्त्याः । सा
नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु । इति इध्मं समादिते जुषाणोऽग्निः प्रतिहर्यतो मे । तस्मिन्नाविदेम सु
मतिं स्वस्ति प्रजा चक्षुः पशून् समिद्धे जातवेदसि ब्रह्मणा अस्मे क्षत्राणि धारयं तमग्ने पुनर्जित्वा ब्राह्मणा दैव्येनोदीदिह्यस्मभ्यं
द्रविणेह भद्रं प्रेमं वोचो हविर्दा देवतासु रातेमंत्रैः पंचभिः समिद्भिरिध्मं जुहोति । ततस्तं भूमिमभ्येषोर्ज सा त्वं वेद्यासीद सिद्धारूरथ

रे। त्वां पवित्रमृषयो भरन्तस्त्वं पुनीहि दुरितान्यस्मत्। अनेन बर्हिः प्रोक्ष्याञ्जलीनां प्रस्तरो सिन्मो स्कन्दे वाय प्रस्तराये त्यनेन
ब्रह्मासनं निधाय। अमुककर्मणा यजमानो यजते त्वं नृपते भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमहे इति कर्त्रा
वरणमंत्रं जपेत्। ततो ब्रह्मा जपति। अहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिस्तदहं मनसे प्रब्रवीमि मिति मनो वाचे
वागायत्र्यै गायत्र्युष्णिहे उष्णिगनुष्टुभे अनुष्टुब्बृहत्यै बृहती पंक्त्यै पंक्तिस्त्रिष्टुभे त्रिष्टुब्जगत्यै जगती प्रजापतये विश्वेभ्यो देवेभ्यो भु
भूर्भुवः स्वः स्वर्जनदोंमिति। ततो ब्रह्मा स्थानमीक्षते। अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योऽस्मत्पाकतर इति
अथासनाद्दक्षिणस्यां तृणं निरस्यति॥ ॥निरस्तः परावसुः सह पाप्मना निरस्तः सोऽस्कयोऽस्मान्द्वेष्टि यं च वयं द्विष्म इति॥
तदासनमन्वालभ्य जपति॥ इदमहमर्वाग्वसोः सदने सीदाम्यृतस्य सदने सीदामि सत्यस्य सदने सीदामि इष्टस्य सदने सीदामि ५३॥
पूर्तस्य सदने सीदामि मा मा ऋषदेव बर्हिः स्वासस्थं त्वाध्यासादेव हर्षणं घृदमनन्ति शोकं। विमृग्वरीं पृथिवीमा वदामि मां भू दे
मिं ब्रह्मणा वावृधानां। ऊर्ज्जं पुष्टं बिभ्रतीमन्नभागं घृतं त्वाभिनिषीदेम भूमे इति मंत्रेणासने उपविश्य बृहस्पतिर्ब्रह्मा सद

न आसिष्यते बृहस्पते यज्ञं गोपायेति। ब्रह्मजपं जपतीति। ततः उद्धृतउन्नितः शम्यं पा। तं मा धावा पृथिवी सभीक्षते। ततः कर्त्ता दे
वस्य त्वा सवितुरिति परिगृह्णामीत्यनेन वेदिं मंत्रं जपेत्॥ ब्रह्मा उपरिस्तृणीहि परिधेहि वेदिं मा त्वा मिमोः शीरमुया शयानां। होतृषद
का नं हरितं हिरण्ययं निष्का एते यजमानस्य लोके। इति सूत्रं जपति॥ ततः कर्त्ता देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
प्रस्तो हस्ताभ्यां प्रसूतः प्रशिरवा परिस्तृणामीति परिस्तृणाति त्रीन्वारानाग्नेये त्रीन्पश्चिमायां संकल्पायां त्रीनुत्तरतः पूर्वस्तरणः
स्याधस्तृणाति। एवमीशानकोणे समागच्छति। अयमर्थः। आग्नेयमारभ्य त्रिस्त्रिर्भिर्दर्भानुदगग्रैस्तृतदर्भाग्राच्छादितितोत्तरदर्भ
मूलैरुदक्संस्थैस्त्रिः परिस्तृणाति। एवं नैर्ऋत्यमारभ्य प्रागग्रैर्दर्भैस्तृतदर्भाधःक्रमेणाग्निपर्यन्तं त्रिः परिस्तृणाति तेनैव नैर्ऋत्यादारभ्यो
र्यं दगग्रैर्वायव्यपर्यन्तं त्रिः परिस्तीर्य वायव्यादारभ्येशानपर्यन्तं प्रागग्रैस्त्रिस्त्रिः परिस्तृणातीति। अत्राधःक्रमेणास्तरणे आग्नेय
स्थितस्य दक्षिणास्तृतदर्भाग्रस्येशानस्थितोत्तरतस्तृतदर्भमिस्य चोत्तराधरीभावानैयमप्राप्ता वुक्तं। तद्दक्षिणोत्तरं करोती
ति दक्षिणदर्भस्याग्रमुपरि करोतीत्यर्थः। हविषां त्वा जुष्टं प्रोक्षामीति मंत्रेणास्तीर्णप्रोक्षणं। तथा कर्त्ता स्वासने दर्भानास्तीर्य

अहे हे धिषव्ये त्यादि दक्षिणान्तं सर्वं ब्रह्मवत् कुर्यात्॥ अथोदपात्रं गृहीत्वा॥ अथाग्नेर्ब्रह्मणस्पतिसत्यधर्मेश्च दीधारन्॥ देवस्य सवितुः
सवे उदपात्रं पुरानिधायाः इहैतद्देवीरमृतं वसाना हिरण्यवर्णा अनुवद्यरूपाः। आपः समुद्रो वरुणश्च राजा संपातभागान् रुविषो जु
षंतां। इंद्रप्रशिष्टा वरुणः सृष्टा आपः समुद्रा दिवमुद्वहंतु। इंद्रप्रसृता वरुणप्रशिष्टा दिवस्पृथिव्या श्रियमावहंतु। इति सपवित्रे
उदपात्रे उदकं क्षिपति॥ विलीनघृतमाज्यं गृहीत्वाधिश्रित्य पर्यग्निकृत्वोदगुद्वास्य पश्चादग्नेरुपसाद्योदगग्राभ्यां पवित्राभ्यामु
त्पुनाति॥ अथमाज्यसंस्कारः॥ ततो हस्तैः स्रुवं निर्मार्ज्मीति मंत्रेण स्रुवं संमृज्य निष्टप्तं रक्षो निष्टप्ता अरातयः प्रत्युष्टं रक्षः प्रत्यु
ष्टा अरातय इति स्रुवं प्रतप्य विष्णोर्हस्तोसि हि देणाप्र [illegible] बृहस्पते। तं त्वा दस्रुव मा दद्दे देवानां [illegible] यद्वा हन्ती। अथ
स्रुवो निदधाति होमान्। अस्तु ता हरश्चंद्र सानागतेन। सर्वयज्ञस्य समनक्ति विश्वावा गेग्नेपश्चिमतः ॥४॥
स्थापिताया माज्यधान्यं पात्र्यां स्रुवेन प्रथमं ग्रहं गृह्णाति॥ ध्रुवः शं पुष्ट्यै त्वा गृह्णामि पुष्ट्यइति द्वितीयं। ध्रुवः शं त्वा गृह्णामि स्व
स्वपोषाये ति तृतीयं। ध्रुवनः शं त्वा गृह्णामि परिमितयोषाये ति चतुर्थं। पात्रांतरेण परिमितं गृह्णाति। ततआज्यधान्यर एवघृतं

स्रुवेण गृहीत्वा सर्वत्र जुहुयात्। अग्नावग्निश्चरति ~~[illegible]~~ प्रविष्टा ऋषीणां पुत्रो अभिशस्तिपाउ। नमस्कारेण नम
यं नसा ते जुहोमि मा देवानां मिथुया कर्म भागं स्वाहा। इदा युनत साव जातवेदो विश्वानि देव वयुनानि विद्वान्। सहस्यानि तव जातवेदस्ते स्योजु
होमि सजुपस्वद् वं स्वाहा। पुरस्तात् युक्तो वह जातवेदोग्ने विद्धि क्रियमाणं यथेदं। त्वं भिषक् भेषजस्यासि कर्त्ता त्वया गामश्वं पुरुषं जनेम स्वाहा।
यत्तस्य चक्षुः प्रवृत्तिर्मुखं च वाचा च श्रोत्रेण मनसा जुहोमि। इदं यज्ञं वि[illegible]श्वं वितनं विश्वकर्मणा देवा यं तु सुमनस्यमानाः स्वाहा। एतैः पुरस्ता
द्धोमान् कृत्वा बृहस्पते सवितर्देहि [illegible] त्वं विषितां सन्तिशं व जवतानन्त रणे ऊज्योक्कनो जीवातवे दद्रात्यग्नये स्वाहा। त्वं सोम
मत्येभ्यो त्वं दिव्योन्हचक्षा अस्मत्संयथो अनुष्पः। अजितो गोत्रं विदुषइव तेशोछानो वायमुशश्चन्ती जिगाय सोमाय स्वाहा। इत्यात्मना
गो कृत्वा अस्यातान् जुहोति। सविता प्रसवानामधिपतिः समावतु अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायाम
स्यां चित्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। एवमुत्तरे घृत्याकृतिमंत्रेषु अस्मिन् ब्रह्मण्यस्मिन् कर्मणि इत्यादि मंत्र शे
षानुषंगो बोद्धव्यः। अग्निर्वनस्पतीनामधिपतिः समावतु। द्यावापृथिवी दातृणामधिपत्नी ते मावतां। वरुणो यामधिपतिः समा

वतु। मित्रावरुणौ वृष्ट्याधिपती तौ मावतां। मरुतः पर्वतानामधिपतयस्ते मावंतु। सोमो वीरुधानामधिपतिः स मावतु। यमः पितॄणाम
धिपतिः स मावतु। वायुरंतरिक्षस्याधिपतिः स मावतु। मृत्युः प्रजानामधिपतिः स मावतु। पितरः परे ते मावंतु। ततो ऽवरे ते मावंतु। तत
स्ततामहास्ते मावंतु। अथ ग्रहादिहोमः॥ ॥तत्र होममंत्रादीनामृष्यादिकमभिधीयते। विभ्राडहिंसद्हमानमित्यस्य अथर्वाङ्गिऋषिः
जगती छंदः सूर्यो देवता आज्यतिलहोमे विनियोगः। एवं सोमादिमंत्रेष्वपि विनियोगो ज्ञेयः। विभ्राडहिंसद्हमानं सासहानं सही
यंसं। सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितं। ईड्यं नाक इंद्रमायुष्मान्भूयासं स्वाहा। सोमस्य॥ शकधूममित्यस्य अ
थर्वाङ्गिऋषिः अनुष्टुप् छंदः सोमो देवता। शकधूमं नक्षत्राणि यद्राजानमकुर्वत। भद्राहमस्मै प्रायच्छन्निदं राष्ट्रमसादिति स्वाहा। भौम
स्य। त्वया मन्यो इति ब्रह्मा ऋषिः त्रिष्टुप् छंदः अंगारको देवता। त्वया मन्यो सरथमारुजंतो हर्षमाणा हृषितासो मरुत्वतः। तिग्मेषव आ ५
व श्रा युधा संशिशाना अभिप्रयंतु नरो अग्निरूपाः स्वाहा। बुधस्य। यद्राजान इति विष्णु ऋषिः पंक्तिश्छंदः बुधो देवता। यद्राजानो विभजं
त इष्टापूर्तस्य षोडशं। यमस्यामी सभासदः। अविस्तस्मात्प्रमुंचंतु दत्तः शितिपात्स्वधा स्वाहा। बृहस्पतेः। बृहस्पतिर्नः परि

पात्विति ब्रह्मा ऋषिः त्रिष्टुप् छंदः बृहस्पतिर्देवता। बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः। इंद्रः पुरस्तादुत मध्यतो
नः सखा सखिभ्यो वरीयः कृणोतु स्वाहा॥ शुक्रस्य। हिरण्यवर्णाः शुचय इति अथर्वा ऋषिः त्रिष्टुप् छंदः शुक्रो देवता। हिरण्यवर्णाः शुचयः
पावका यासु जातः सविता यास्वग्निः। या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवंतु स्वाहा। शुक्रो ऽसि भ्राजो ऽसि स्वर
सि ज्योतिरसि आप्नुहि श्रेयांसमति समं क्राम स्वाहा। त्येव वा मंत्रः। शनेः॥ सहस्रबाहुरिति नारायण ऋषिः अनुष्टुप् छंदः शनि
र्देवता। सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं स्वाहा॥ राहोः। दिव्यं चित्रमिति
कौशिक ऋषिः त्रिष्टुप् छंदः राहुर्देवता। दिव्यं चित्रमृतुधा कल्पयत मृत्युनाम ग्रीवं मपन्नु देति। तमादित्यः प्रतरन्नेतु सर्व
त आपद्दमां लोकान्नेतु संचरति स्वाहा। केतोः॥ यस्ते पृथुरिति अथर्वाङ्गिऋषिः त्रिष्टुप् छंदः। केतुर्देवता। यस्ते पृथुस्तनयि
त्नुर्य ऋष्टो देवताकेतुर्विश्वमाभूषतीदं। मा नो वधीर्विद्युता देव सस्यं मोत वधी रश्मिभिः सूर्यस्य स्वाहा॥ अथाधि
देवतानां॥ ॥ईश्वरस्य॥ मा नो विदन्निति ब्रह्मा ऋषिः अनुष्टुप् छंदः रुद्रो देवता। मा नो विदन्विव्याधिनो अभिव्याधि

नो विदन्। आरुरुक्ष्वा अस्मादिषूचीरिंद्र पातय स्वाहा। उमायाः। आपो हि ष्ठेति सिंधुद्वीप ऋषिः गायत्री छंदः उमा देवता। आ
पो हि ष्ठा मयो भुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे स्वाहा। स्कंदस्य। अग्निरिवेति ब्रह्मा ऋषिः त्रिष्टुप् छंदः स्कंदो देवता। अ
ग्निरिव मन्यो त्विषितः सहस्व सेनानीः नो अभिभूत एधि। हत्वाय शत्रून्विभजस्व वेद ओजो मिमानो विमृधो नुदस्व स्वाहा। वि
ष्णोः। प्रतद्विष्णुरित्यथर्वा ऋषिः गायत्री छंदः। विष्णुर्देवता। प्रतद्विष्णुः स्तवते वीर्याणि मृगो न भीमः कुचरो गिरिष्ठाः। परावत
आजगम्यात् परस्याः स्वाहा। ब्रह्मणः। ब्रह्म जज्ञानमित्यथर्वा ऋषिः त्रिष्टुप् छंदो ब्रह्मा देवता। ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीम
तः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा। इंद्रस्य। इंद्रेममिति ब्रह्मा ऋषिः त्रिष्टुप्
छंदः इंद्रो देवता। इंद्रेमं प्रतरं कृधि सजातानामसद्वशी। रायस्पोषेण संसृज जीवातवे जरसे नय स्वाहा। यमस्य। यः प्रथ ॥ ६ ॥
म इति ब्रह्मा ऋषिः त्रिष्टुप् छंदः यमो देवता। यः प्रथमः प्रवतमाससाद बहुभ्यः पंथामनुपस्पशानः। यो अस्येशे द्विपदो यश्च
चतुष्पदस्तस्मै यमाय नमो अस्तु मृत्यवे स्वाहा। कालस्य। रोहितः काल इत्यस्य अथर्वा ऋषिः त्रिष्टुप् छंदः कालो देवता। रो

हितः कालो अभवद्रोहितो ग्रे प्रजापतिः। रोहितो यज्ञानां मुखं रोहित स्वराभरत् स्वाहा। चित्रगुप्तस्य। यदाज्ञातमिति कौशिक ऋषिः अ
नुष्टुप् छंदः चित्रगुप्तो देवता। यदाज्ञातमनाज्ञातमर्थस्य कर्मणो मिथः। अग्ने त्वं तस्मान्याहि सरिरेव यथायमग्नये स्वाहा। चित्रश्चिकि
त्वान्महिषः सुपर्ण आरोचयन् रोदसी अंतरिक्षं। अहोरात्रे परि सूर्यं वसाने प्रास्य विश्वा तिरतो वीर्याणि स्वाहेति वा॥ ॥ अथ प्रत्यधि
देवतानां। तत्राग्नेः। समास्त्वाग्न इति ब्रह्मा ऋषिः त्रिष्टुप् छंदः अग्निर्देवता। समास्त्वाग्न ऋतवो वर्धयंतु संवत्सरा ऋषयो यानि सत्या। सं
दिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्रः स्वाहा। अपां। शंनो देवीरिति ब्रह्मा ऋषिः गायत्री छंदः आपो देवता। शंनो देवीरभि
ष्टय आपो भवंतु पीतये शंयोरभिस्रवंतु नः स्वाहा। भूमेः। भूमे मातर्निधेहि ब्रह्मा ऋषिः अनुष्टुप् छंदः पृथिवी देवता। भूमे मातर्नि
धेहि मा भद्रया सुप्रतिष्ठितं। संविदाना दिवा कवे श्रियां मा धेहि भूत्यां स्वाहा। विष्णोः। इदं विष्णुरिति अथर्वा ऋषिः गायत्री छंदः इंद्रो दे
वता। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूढमस्य पांसुरे स्वाहा। इंद्रस्य। इंद्र जुषस्वेति अथर्वा ऋषिः अनुष्टुप् छंदः इंद्रो देवता।
इंद्र जुषस्व प्रवहा याहि शूर हरिभ्यां। पिबा सुतस्य मतेरिह मधोश्चकानश्चारुर्मदाय स्वाहा। इंद्राण्याः। प्रेतपादाविति अथर्वा ऋ

षिः अनुष्टुप्छंदः इंद्राणी देवता। अतिं पादौ प्रस्कंदं तं दुह्रणातोग्रहस्तात्। इंद्राण्येतु प्रथमाजीतामुषिता पुरः स्वाहा। प्रजापतेः नक्कं जातेति।
अथ ब्रह्मऋषिः अनुष्टुप्छंदः प्रजापतिर्देवता। नक्कं जातेस्योषधे रामे अन्मह्मे असिक्तिचा इदं रजनीरजयकिलासं च पलितं च यत् स्वाहा।
प्रजापते न त्वदेतानीत्यादिमंत्रो वा। सर्पाणां। शेरभकेति अथ वशिष्ठऋषिः पंक्तिछंदः सर्पा देवता। सेरभक शेरभ पुनर्वो यंतु यातवः पुन र
र्हेतिः किमिदिनः। यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त स्वाहा। सर्पान्नु सर्प पुनर्वो यंतु पा० तवइत्यादिमंत्रो वा। ब्रह्मणः। त
वेदिशामिति अथ वशिष्ठऋषिः त्रिष्टुप्छंदः ब्रह्मा देवता। येदिशामन्तदेशो स्योजुकनुकनिजातवेदः। सर्वस्योदिशो ग्न्यो निदासं त्यस्मान्। ब्रह्मत्वा
जे परांचो अयं तां प्रत्येगेनात्वतिसरेण हस्ति स्वाहा। अथ विनायकादीनां। निर्जच्चिमिति द्रविणोदा ऋषिः त्रिष्टुप्छंदः विनायको दे
वता। निर्ज्ञम्यं लिजाम्यः निरराति सुवामसि। अथ या नक्ष्मानानितः प्रजाजात् अतिन्नयामसि स्वाहा। दुर्गायाः। सतनाजितमिति ७।
अथ वशिष्ठऋषिः त्रिष्टुप्छंदः दुर्गा देवता। सतनाजितं सहमानमग्निमुक्थैर्हवामहे परमात्सधस्थात्। स नः पर्षदति दुर्गाणि विश्वा क्षामदे रा ३
वो दुरितात्यग्निः स्वाहा। वायोः। अंतरिक्षे वाय इति ब्रह्मा ऋषिः अनुष्टुप्छंदो वायुर्देवता। अंतरिक्षे वायवे समनमंस आ ध्रोति।

अंतरिक्षे वायवे मंस आ ध्रेति। यथांतरिक्षे वायवे समनमन्त्रेवा मह्यसन्नमः सन्नमंतु स्वाहा। आकाशस्य। प्राम्यत इत्यथ वशि
षिः त्रिष्टुप्छंदः आकाशो देवता। प्राम्यतीतः पंचतोविधिक्षिसुधन्वतः यथास्वर्गमितिरोदयैते। येनरोहात्परमायव्य यद्वयं अन्तमी
नाकं परमे व्योमन् स्वाहा। अश्विनोः। सचेन्नयोयो अश्विनेति अंगिरा ऋषिः अनुष्टुप्छंदः अश्विनौ देवता। संचेन्नयोयो अश्वि
नाकामिनौ संवय वद्भि व यः संवां भगासो अग्मत संचित्तानि समु व्रता स्वाहा। दिक्पालानां॥ ॥ तत्रेंद्रस्य इममिंद्र इत्यस्य मिति ब्रह्मा
ऋषिः त्रिष्टुप्छंदः इंद्रो देवता। इममिंद्र वर्धय क्षत्रियं म इमं विशामेकवृषं कृणु त्वं। निरमित्रानक्ष्णुह्यस्य सर्वांस्तान्रंधयास्मा
हमुत्तरेषु स्वाहा। अग्नेः। अग्नेमन्व इति ब्रह्मा ऋषिः त्रिष्टुप्छंदः अग्निर्देवता। अग्निर्मन्वे प्रथमस्य प्रचेतसः। यावजन्य
स्य वकुधायनिंधते। विशो विशः प्रविशिवांसमीमहे वसेनोमुंचत्वंहसः स्वाहा। यमस्य यमो मृत्युरिति ब्रह्मा ऋषिः त्रि
ष्टुप्छंदः यमो देवता। यमो मृत्युरघमारो निऋथो बभ्रुः शर्वो स्ता नीलशिखंडः। देवजनाः सेनयोत्तस्थिवांसस्ते अ
स्माकं परिवृजंतु वीरान्॥ ॥ स्वाहा। निर्ऋतेः। अनितं निर्ऋतिः अथ वशिष्ठऋषिः त्रिष्टुप्छंदः निर्ऋतिर्देवता। अनितं

निऋतिर्दैत्वियिस्त्र रागश्वानि धान्या। मत्स्योयोमसंक्रुध्यति सत्रपाशान्मुच्यतेस्वाहा। वरुणस्य। येपश्या दितिऋषिवसिष्ठः त्रि
ष्टुप्छंदः वरुणो देवता। येपश्याजुत्कतिजातवेदः प्रतीच्यादिशोभिहासंत्यस्मान्। वरुणत्वाते परांचो व्यथंतां प्रत्यैगे नरे ण
हन्मि स्वाहा।। वायोस्सवितुरिति अथर्वण ऋषिः त्रिष्टुप्छंदः वायुर्देवता। वायोः सवितुस्त्रिर्देवपानि नन्मह्याबाश्च
स्यपरिस्तुवन्नुवाःनुस्तैनोमुंचतमंहसः स्वाहा। सोमस्य। यन्नरनइति ब्रह्मा ऋषिः त्रिष्टुप्छंदः सोमो देवता। यन्नत्र
तातवेदाउदीच्यादिशोभिदासंत्यस्मान्। सोमस्त्वाते परांचो व्यथंतां प्रत्यगेनाप्रतिसरेण हन्मि स्वाहा। ईशस्य।
धाता दधातुन इति अंगिरा ऋषिः गायत्री छंदः ईशो देवता। धाता ददौं उनोरयिमीशानो जगतस्पतिः। सनःपूर्णेन
यछतु स्वाहा। अनंतस्य। अनंतं विंशितितनिति अथर्वण ऋषिः पंक्तिछंदः अनंतो देवता। अनंतं विततं पुरुत्रा ८
नंतमंतवच्चा समंते। तेनाकपालश्चातिविचिन्वन् विद्वान्भूतयुतभव्यमस्य स्वाहा। ब्रह्मणः। ब्रह्मपरमिति अ
थर्वण ऋषिः त्रिष्टुप्छंदः ब्रह्मा देवता। ब्रह्मा परं युज्यता ब्रह्मपूर्वं ब्रह्मांततो मध्यतो ब्रह्मसर्वंतः। अनाबाधी

देवपुरां प्रपद्य शिवा स्योनायतिर्जेर्केविराजस्वाहा। अथ नवसूनां। यानावइति त्रिष्टुप्छंदः वसवो देवता। यानावह उश्रतोदेवदे
वांस्तान्प्रेरयस्वेअग्ने सधस्थे। जक्षिवांसः पपिवांसोमधुन्यस्मै धत्त वसवो वसूनि स्वाहा। रुद्राणां। मानोविदन्नित्याविद्धवौ
त्तं। आदित्यानां। आदितेस्यइति ब्रह्मा ऋषिः त्रिष्टुप्छंदः आदित्यो देवता। आदितेस्यो अंगिरेस्यो यद्दिदं पूते न मिश्रं प्र
तिवेदयामि। शुद्धवूस्तो ब्राह्मणस्यातिहत्यैतंस्वर्गंसुकृतावर्पीतं स्वाहा। मरुद्गणस्य। मरुतांमन्वेइति अथर्वण ऋषिः त्रि
ष्टुप्छंदः मरुतो देवता। मरुतांमन्वे अधिमेकुवंतु प्रेमवाजसातेचउः। आसुनीवस्तुयमानऊतयेतेनो मुंचंत्वंहसः स्वाहा।
ब्रह्मणः। इमाब्रह्मइति ब्रह्मर्षिः त्रिष्टुप्छंदः ब्रह्मा देवता। इमाब्रह्मबृहद्दिवः कृणवबदिंद्रा यमग्निर्यःसखपी। मत्स्योगो
जेस्सस्य क्षयति स्वराजाउरश्चिद्विश्वः शरणं बन्नय स्वाहा। अच्युतस्य। तद्विष्णोरिति ब्रह्मा ऋषिः गायत्री छंदः विष्णुर्देवता। तद्विष्णोः
परमं पदं सदापश्यंति सूरयः। दिवीवचक्षुरातंतं स्वाहा। रुद्रजलेति ब्रह्मा ऋषिः अनुष्टुप्छंदः रुद्रो देवता। रुद्र
जलाषजेषजनिलशिखंडकर्मकृत। प्राशंप्रतिपाशो जस्यरसान्कृणवोषधे स्वाहा। अर्कस्य। विश्वोविराजइति ब्रह्मा

ऋषिः त्रिष्टुप् छंदः अर्को देवता। वाजो विराजो वृषभो मतीनामारोह शुक्रपृष्ठोंतरिक्षं। घृतेनार्कमभ्यर्चंति वत्सं ब्रह्मण
वर्द्धयंति स्वाहा। वनस्पते॰ वनस्पत इति प्रजापतिर्ऋषिः त्रिष्टुप् छंदो वनस्पतिर्देवता। वनस्पते वीड्वंगो हि भूया अस्मत्स
खा प्रतरणः सुवीरः गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि स्वाहा। अथैते ब्राह्म्यानि सूक्तानि। तत्र सूर्यस्य।
विषसहिं सहिमानं सासहनं सहीयसं। समानं सहोजातं सोजितं संधनाजितं। ईड्यं नाम ह्व इंद्रमायुष्मान् भूयासं श्वमिंद्रप्रियो दे
वतानां भूयास॰ समित्याद्युत्तरमंत्रत्रयेषु विषसहिं सहिमानमित्यादिरीड्यं नाम ह्व इत्यंतो मंत्रभागः प्रत्येकं पूर्वयोज्यः इंद्रप्रि
देवानां भूयासं इंद्रप्रियः प्रजानां भूयासं इंद्रः प्रियः पशूनां भूयासं विषासहिं सहमानं सासहानं सहीयसं सहमानं सहो
जितं स्वर्जितं गोजितं संधनाजितं। ईड्यं नाम ह्व इंद्रप्रियः समानानां भूयासं। उदिह्युदिहि सूर्य वर्चसा माभ्युदिहि द्विषंश्च १८
मह्यं रध्यतु मा चाहं द्विषते रधं तवेद्विष्णो बहुधा वीर्याणि। त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्यो
मन्। उदिह्युदिहि सूर्य वर्चसा माभ्युदिहि। याश्च पश्यामि याश्च न तेषु मा सुमतिं कृधि। तवेद्विष्णो बहुधेत्यादि मंत्रशेषः पूर्ववत्।

अथ सूर्यसूक्तं॥ अथ सोमस्य शाकधूमन ऋत्राणि यन्नाज्ञानि म कुर्वतः। भद्राहमस्मै प्रायच्छन्निदं राष्ट्रमसादिति। भद्राहं नो
मध्यंदिने भद्राहं सायमस्तु नः। अहो राज्ञा सोमं नक्षत्रेभ्यः सूर्याचंद्रमसाभ्यां। भद्राहमस्मभ्यं राजन् छकधूम त्वं कृधि। यो नो भद्रा
हमकरः सायं नक्तमथो दिवा। तस्मै ते नक्षत्रराज शाकधूम सदा नमः। इति सोमसूक्तं। अथ मन्योः। यं त्वया मन्यो सरथ
मारुजंतो हर्षमाणासो धृषिता मरुत्वः। तिग्मेषव आयुधा संशिशाना अभि प्रयंतु नरो अग्निरूपाः। अग्निरिव मन्यो त्विषि
तः सहस्व सेनानीर्नः सहुरे हूत एधि। हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व। सहस्व मन्यो अभिमातिमस्मे रुजन्
मृणन्प्रमृणन्प्रेहि शत्रून्। उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वं। एको बहूनामसि मन्यवीडितो विशं
विशं युधये सं शिशाधि। अकृत्तरुक्त्वया युजा वयं द्युमंतं घोषं विजयाय कृण्मसि। विजेषकृदिंद्र इवानवब्रवोऽस्माकं म
न्यो अधिपा भवेह। प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ। आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरं। क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि। संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः।

नियोद्धा नाहृदयेषु शत्रवः पराजिता मो अपनिलयंता ॥ सोमस्य सूक्तं । अथ बुधस्य । सोमस्य सो युधां पते नूनो नाम वा असि । अनंतं
दर्शनाद्रधि प्रजया च धनेन च । दृशोसि दृशतोसि समग्रोसि मन्त्रतः समग्रः समंतो न्वया संगो निरश्वैः प्रजापशुभिर्गृहैर्धनेन च । योस्मान्द्वे
ष्टि यं च वयं द्विष्मस्तस्य त्वं प्राणेना प्यायस्वा श्रा व यं प्यासिषिमहीगोभिरश्वैः प्रजया पशुभिर्गृहैर्धनेन । आ श्रुमाप्यायं तियमक्षितमक्षयं नि
तेनास्मानिंद्रो वरुणो बृहस्पतिरा प्यायमं तु भुवनस्य गोपाः ॥ अथ बृहस्पतेः । न ज्ञादधि श्रेयः प्रेदि बृहस्पतिः पुर एतात्ते अस्तु । अथेमम स्याव
र आ पृथिव्या आरे शत्रून्कृणुहि सर्ववीरां । इति बृहस्पति सूक्तं ॥ ॥ अथ शुक्रस्य । शुक्रोसि भ्राजोसि स्वरसि ज्योतिरसि । आप्नुहि श्रेयां
समति समं क्राम । इति शुक्र सूक्तं । अथ शनेः ॥ ॥ प्राणाय नमो यस्य सर्वमिदं वशे । यो भूतः सर्वस्येश्वरो यस्मिन्सर्वं प्रतिष्ठितं । नमस्ते
प्राण क्रंदाय नमस्ते स्तनयित्नवे । नमस्ते प्राण विद्युते नमस्ते प्राण वर्षते । यत्प्राण स्तनयित्नुनाभिक्रंदत्योषधीः । प्रवीयंते गर्भान्दधतेथो १०
बह्वीर्विजायंते । इति शनि सूक्तं । अथ राहोः । राहो राजा तत त्वरति स्वरं ति ममी हृदं ति हृर्व्यः । सहस्रमस्य इलानत्वा शतं तन्वा नि
न श्यत्स्यम्नये स्वाहा । इति राहु सूक्तं ॥ ॥ अथ केतोः । यस्ते पृथु स्तनयित्नु वरिष्ठा देवैः केतु विश्वमा भूषतीत्वा दंमानो व

धिर्विकृता देवस्या स्मोन वधीरश्मिभिः । सूर्यस्या समना वदास वितिश्च वतां प्रजापते दुहितरौ संविदाते । न येना संगच्छा उपमा समसिन्ना वारु
वदानि पितरः संमतेषु विकृते स ते ता न वरिष्ठा नाम वा असि । यं त के स दारु दस्ते मे सं स वा च स ॥ इति केतु सूक्तं ॥ अथेश्वरस्य ॥ मा नो विदन्°
मसांतरं । ऋचा ४ ॥ ~~[illegible]~~ ॥ ईश्वर सूक्तं ॥ अथ उमा सूक्तं ॥ पृतनाजितं० दुरितात्यग्निः । ऋचा १ ॥ स्कंद सूक्तं ॥ अग्निरिव मन्यो० तिल
यंता । ऋचा ६ । विष्णु सूक्तं । यन्न इंद्रो अखनद्यद० परस्याः । ऋचा ५ ॥ ब्रह्म सूक्तं ॥ ब्रह्म सूक्तं । ब्रह्मजज्ञानं० स्वधावत ऋचा ७ ॥ इंद्र सूक्तं ।
इंद्रो जयाति न० रुषिद्व्यः । ऋचा ३ ॥ यम सूक्तं ॥ यमो मृत्यै स्वकरघमारो० स्यामा ऋचा ३ ॥ अथ काल सूक्तं । रोहितः कालो अश्व व०
मिसंचरत् । ऋचा १ । चित्रगुप्त सूक्तं ॥ अवक्रियस्ता व्ययतोव्ययं० दुरिता निशाकः । ऋचा ४ ॥ ॥ अथ प्रत्यधिदेवतानां । अग्नि
सूक्तं । अग्ने र्मन्वे० त्वं हसः । ऋचा ७ ॥ अपां सूक्तं । शन्नो देवी० वार्षिकीः । ऋचा ४ ॥ धरा सूक्तं ॥ सत्यं बृहद्० विनन्नलोकं । ऋचा ॥
विष्णु सूक्तं । यन्न इंद्रो पूर्ववत् (ऋचा ५) इंद्र सूक्तं । इंद्रो जयाति० इंद्र सूक्तं पूर्ववत् । ऋचा ३ । इंद्राणी सूक्तं । प्रेतं पादौ० सुविता पुरः । ऋचा ॥
प्रजापति सूक्तं । प्रजापते० प्रविष्टाः । ऋचा २ ॥ सर्प सूक्तं । शेष्यध रज कं० सोन्नि न्यता । ऋचा ८ ॥ ब्रह्म सूक्तं । ब्रह्मजज्ञानं निता
दि ब्रह्म सूक्तं पूर्ववत् । ऋचा ७ ॥ ॥ अथ विनायकादि पंचकस्य गणपति सूक्तं । निर्जनम्यं० नासमामसि । ऋचा ४ । अथ दु

गर्ग्याः। इतनाजितमित्यादिसूक्तं दुर्गायाः पूर्ववत्। वायुसूक्तं। वायोः सवितु० मंत्रस्य। ऋचा १॥ आकाशसूक्तं। पुरंयो ब्रह्मणस्प
ते० ज्योतिषः। ऋचा ३॥ अश्विनीसूक्तं॥ अश्विना ब्रह्मणा यात० मस्वाहा। ऋचा १।१५॥ अथ लोकपालानां। अथेंद्रस्य। इंद्रो जया
तीत्यादि इंद्रसूक्तं पूर्ववत्। ऋचा ३॥ अथाग्नेः। अग्नमन्वित्यादि अग्निसूक्तं पूर्ववत्। अ ऋचा ७॥ अथ यमस्य। यमो मृत्क रित्या
दि यमसूक्तं पूर्ववत्। ऋचा ३। निर्ऋतिसूक्तं। यस्यास्त आसनी घोरे० मृत्यवे। ऋचा ३॥ वरुणसूक्तं। उदुत्तमं० स्वाहा। ऋचा १॥
अथ वायोः। वायोः सवितुरित्यादि वायुसूक्तं पूर्ववत्। अथ सोमस्य। आ कश्यमित्यादि सोमसूक्तं पूर्ववत्। ऋचा ४॥ अथेश्वरस्य।
मानो विदन्नित्यादि ईश्वरसूक्तं पूर्ववत्। ऋचा ४॥ अथानंतस्य। शेरन केत्यादि अनंतसूक्तं पूर्ववत्। ऋचा ८॥ अथ ब्रह्मणः। ब्रह्मा परं
युज्यतां० विराज। ऋचा १॥ अथ वसूनां। याना वह इत्यादि वसुसूक्तं पूर्ववत्। ऋचा ११॥ अथादित्यानां। आदित्यसो अंगिरे आ०
पचतो बन्नू वा। ऋचा ३॥ मरुद्गणस्य। मरुतां मन्वे० मुंचतमं हसः। ऋचा ॥ पूर्ववत्। अथ ब्रह्मणः। ब्रह्मजज्ञानमिति ब्रह्मसूक्तं पूर्ववत्। ११
अच्युतस्य। यन्नः इंद्र इत्यादि अच्युतस्य पूर्ववत्। ऋचा ५॥ अथ शस्य। मानो विदन्नित्यादि ईश्वरसूक्तं पूर्ववत्। ऋचा ४॥ अथार्कस्य। व
सो विराजो हसो० वर्धयंति। विषासहिं सहमानमित्यादि अर्कसूक्तं पूर्ववत्। अथ वनस्पतेः। वनस्पते० जेलानि। ऋचा १॥ एवं स

ऋजपानं तरं यथा। पुनः प्रसविता प्रसवानामित्यादि सप्तदशाज्यानात्रं कृत्वा पूर्णाहुतिं कुर्यात्। यथा। यदिन्न्वस्य पञ्चोन वतित दायन्ते देवा अन्नमेव
न्नत्रागं धेयमामावास्ये संवसंतो महित्वा। तेनानो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरं स्वाहेति जुहोति। शुक्लपक्षे चेत् दाश्
र्णपश्चात् उत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय। तस्यां देवैः संवसंतो महित्वा नाकस्य पृष्ठे समिधा मादेम स्वाहेति। ततः समृद्धिर्जुहो
ति। यथा। आकूत्यै स्वाहा। सन्नद्धेव्यस्वाहा। ऋचा सोम षष्ठि सम्र्धयगा रेणरथंतरं। बृहन्नायज्ञवर्तनिस्वाहेति च ततः। ततः सन्नतिहोमः। य
था पृथिव्यामग्नये समनमन्त्स आर्ध्नोत्। यथा पृथिव्यामग्नये समनमन्नेवं मह्यं संनमः संनमं पृथिवी धेनुस्तस्या अग्निर्वत्सः। सा मे अग्नि
ना वत्सेनेषमूर्जं कामं दुहां। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। अंतरिक्षे वायवे समनमन्त्स आर्ध्नोत्। यथांतरिक्षे वायवे समनमन्नेवं मह्यं संनमः
संनमंतु। अंतरिक्षं धेनुस्तस्या वायुर्वत्सः। सा मे वायुना वत्सेनेषमूर्जं कामं दुहां। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। दिवि सूर्याय दि
व्यादित्याय समनमन्त्स आर्ध्नोत्। यथा दिव्यादित्याय समनमन्नेवं मह्यं संनमः संनमंतु। द्यौर्धेनुस्तस्या आदित्यो वत्सः। सा म आदित्येन १२
वत्सेनेषमूर्जं कामं दुहां। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। इति सन्नतिहोमः। अथोपस्तीर्यतोमः॥ ॥प्रजापते न त्वदेतान्यन्यो वि
श्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा। ततः स्विष्टकृद्धोमः। सर्वेषां चतुर्णां

नुत्तरतो दृहयस्तच्छिन्नत्वाद्धिरन्निधार्या। आदेवानामपि पंथामगन्म यच्छक्रवाम तदनुप्रवोढुं। अग्निर्विद्वान्स यजात्स इद्धोता अध्वरा
र्मं श्रातेन्म सथं रेमस्यन्नाविस्क्तं वंक्रमेण दिवि अंतरिक्षे पृथिव्यां च ज्वलास्कं वं प्राग्दंडमग्नेरुत्तरब्रह्मणा जातवेदसमग्निंहोता
रमजरं रयस्मृतं। सब्रूदिवानां जनिमानि विद्वान्यथाभागं वहतु हव्यमग्निरग्नये ति स्वाहेति समिधं जुहोति। अनंतरं एधोस्ये
धिषीमस्वाहा। समिदसि समेधिषीमहि स्वाहा। तेजोसि तेजो मयि धेहि स्वाहा। इति मुखं मार्जयति॥ ॥ततो विष्णुक्रमान्क्रामेत्। विष्णोः क्रमोसि
सपत्नहा। पृथिवीशंसितो ग्नितेजाः पृथिवीमनुविक्रमे हं पृथिव्यास्तं निर्भजामो योस्मान्द्वेष्टि यं च वयं द्विष्मः मा नो वित्तं प्राणो जहातीति विष्णोः
क्रमोसि सपत्नहा। अंतरिक्षसंशितो वायुतेजाः। अंतरिक्षमनुविक्रमेहमंतरिक्षात्तं निर्भजामो योस्मान्द्वेष्टि यं च वयं द्विष्मः समा
जि वित्तं प्राणो जहात् इद्धोता सोध्वरान्सऋतून्कल्पयत्वग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धे प्राग्वर्द्धितसंसृष्टं कृत्वा प्रायश्चित्तानि जुहोति॥
स्वाहेष्टेभ्यः स्वाहा। वषट्कृतिभ्यः स्वाहा। नेष्टं जंतुरिष्टेभ्यः स्वाहा। निष्कृतिदुरिष्ट्यै स्वाहा। देवीभ्यस्तनूभ्यः स्वाहा। अयाश्चाग्नेस्यनभि १२
शस्तीत्य सत्वमित्वमया असि। अयसा मनसा धृतोऽस्मृह्व्यमोहिष स्वाहा। उं स्वाहा। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुवःस्वः स्वाहा।
इति प्रायश्चित्तहोमः॥ ॥ततः स्कंदहोमः। यन्मे स्कन्नं मनसो जातवेदो यद्वा स्कंदद्धविषो यत्र यत्र। तत्सृष्टोपि दृप्रुषः संजुहोमि सत्याः

संतु यजमानस्य कामाः स्वाहा। पुनर्मैत्विंद्रियं पुनरात्मा द्रविणं ब्राह्मणं च। पुनरग्नयो धिष्ण्या यथास्थानं कल्पयंतामिहैव स्वाहेति। ततो स्मृतिहोमः।
यदस्मृति चकृम किंचिदग्न उपारिम चरणे जातवेदः। ततः पाहि त्वं नः प्रचेतः शुभे सखिभ्यो अमृतत्वमस्तु नः स्वाहा। अथ संस्थितहोमः॥
यदद्य त्वा प्रयति यज्ञे अस्मिन्होतश्चिकित्वन्नवृणीमहीह। ध्रुवमयो ध्रुवमुताशविष्ठाः प्रविद्वान्यज्ञमुपयाहि सोमं स्वाहा। समिंद्र णो म
नसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्त्या। सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमतौ यज्ञियानां स्वाहा। यानावह उशतो देव देवांस्ता
न्प्रेरय स्वे अग्ने सधस्थे। जक्षिवांसः पपिवांसो मधून्यस्मै धत्त वसवो वसूनि स्वाहा। सुगा वो देवाः सदना अकर्म य आजग्म सदने मा
जुषाणाः। वहमाना भरमाणा स्वा वसूनि वसुं घर्मं दिवमारोहतानु स्वाहा। यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा। एष ते
यज्ञो यज्ञपते सहसूक्तवाकः सुवीर्यः स्वाहा। वषट्कृतेभ्यो वषट्कृतेभ्यः। देवा गातुविदो गातुं वित्त्वा गातुमित स्वाहेति॥ अथ होमः॥
मनसस्पत इमं नो दिवि देवेषु यज्ञं स्वाहा। दिवि स्वाहा। पृथिव्यै स्वाहा। अंतरिक्षं स्वाहा॥ वाते धाः स्वाहा। अथाज्यस्थालीहुतं शेषं च
उद्गृहीतं आज्यं धात्वं स्थापयित्वा स्रुवेण गृहीत्वा। जुहोत्येकामाकृतिं त्वं ह्रीं इति मानसहोमः। स्तरणबर्हिस्त्रीणि गुणीकृत्यैकत्वाज्य
धानात्तेनोत्तरस्य पृथिव्यै त्वेति मूलं युनक्ति अंतरिक्षाय त्वेति मध्यं दिवे त्वेत्यग्रं एवं त्रिः संबर्हिरक्तं सविशाखं तेन समिद्वेणव

वसुनासंमरुद्भिः। सर्वदैवैर्विश्वेदेवेभिरक्तमिदं गच्छतु बर्हिः स्वाहेति बर्हिः कृत्वा संस्रावं भागास्थ विषाप्रहंतः प्रस्तरेष्ठा बर्हिषदश्च देवाः इमं य
ज्ञमभिगृणंतः स्वाहा। देवानामाज्यपानामादयंतां स्वाहेति। संस्रावं जुहोति। ततो द्वितीयेहनि पुण्याहवाचनानंतरं पूर्णाहुतिं जुहोति। ततः स्रुक
स्रुवौ घृतपूर्णौ कृत्वा समास्त्वाग्न ऋतवो वर्धयंतु संवत्सरा ऋषयो यानि सत्या। संदिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्रः। अन्य
च तिसृष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त। अग्ने ब्राह्मणस्याति हव्येत स्वर्गं सुतावपितं स्वाहेति पूर्णाहुतिं कृत्वा स्रुक्स्रुवौ घृ
घृतादनिः स्मृतः सपत्नः रूपणो दिवि अंतरिक्षे सीद पृथिव्यां। सीदच्छत्तरो हं न्यासां समयधरेमस   इति स्रुक्स्रुवं क्रमेण दिवि अंतरिक्षे
पृथिव्यां च कृत्वा स्रुक्स्रुवं प्राग्वदुत्तरतस्थापयेत्। ततो मुच्चाभिब्राह्मणज्जातवेदसमग्निं होतारमजरं रथस्थं। तास वदेवानां जनिमानविद्वान्यथा
भागं वहतु हव्यमग्निरग्नये स्वाहेति॥ अनंतरये धोस्थे थाषीमहि स्वाहा। तेजोसि तेजो मयि धेहि इति मुखं विमार्जयति। ततो विष्णुक्रमान्क्रम
यते विष्णोः क्रमोसि सपत्नहा पृथिवीसंशितोग्नितेजाः पृथिवीमनु विक्रमे हं पृथिव्यास्तं निर्भजामो योस्मान्द्वेष्टि यं च वयं द्विष्मः समाजीवान्त् १३
प्राणो जय विष्णोः क्रमोसि सपत्नहा अंतरिक्षसंशितो वायुतेजाः अंतरिक्षमनु विक्रमे हं अंतरिक्षान्निर्भजामो योस्मान्द्वेष्टि यं च व
यं द्विष्मः समाजीवान्त्प्राणो जय विष्णोः क्रमोसि सपत्नहा अंतरिक्षसंशितो वायुतेजाः अंतरिक्षमनु विक्रमे हं अंतरिक्षान्निर्भज

॥द्वेष्टि यं च वयं द्विष्मः समाजीवाय प्राणो जुहोति। विष्णोः क्रमोसि सपत्नहा द्यौरसंशितः सूर्यतेजाः दिवमनु विक्रमे हं दिवस्तं निर्भजामो योस्मा
न्द्वेष्टि यं च वयं द्विष्मः समाजीवानं प्राणो जुहोत्विति त्रीणि विष्णुक्रमान् क्रांत्वा बहिर्निष्क्रम्य सूर्यस्यावृतमन्वावर्त्ते दक्षिणमन्वावृतं सामेद्र
विणं यच्छतु सा मे ब्राह्मणवर्चसमिति प्रदक्षिणं कृत्वा अगन्म स्वः स्वरगन्म संसूर्यस्य ज्योतिषागन्म वसोन्नूयाय वसुमान्यज्ञो वसुवी
शिषीय वसुमान्भूयासं वसुमयि धेहि इत्यादित्यं निरीक्षेत। अपोदपात्रमुत्थापयति। इंद्रेण च दत्सा वयं मित्रस्य वरुणस्य च। ब्राह्मण
स्थापयितं पात्रं पुनरुत्थापयामसी उत्थापत उदकेनापो हिष्ठा मयोभुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे इति मंत्रेण यजमानं मा
र्जयति। ततो यजमानांजलौ स्रुवमुदपात्रस्थं इंद्रेण वचसा पवित्रकं वाचार्प्ययित्वा समुद्रं वः प्रहिणोमि स्वां योनिमपीतता। अरिष्य
सर्वहा यसो मा च नः किंचनाममतत् इदं जनासो विदथ महद्ब्रह्म वदिष्यति। न तत्पृथिव्यां नो दिवि येन प्राणंति विरुध इति प्राच्यां तदु
दकं यजमानांजलौ निक्षिपेत् तेन यजमानो वीरपुरुषोहमिति मुखं विमार्ष्टि ततो होता व्रतानि व्रतपतये स्वाहेति समिधमाधा
यासंत्यत्वर्त्तेन परिषिंचामि जातवेदा इति। अग्निं परिषिंच्याज्यस्थालीमुत्थाप्य ब्रह्मणे पूर्णपात्रं दद्यात्। ततः आचार्याय धेनुं दद्यात्॥
मंगल्यस्वस्त्ययनादि कुर्यात्॥ इत्यक्षरतंत्रं॥ ॥अनंतरं गुरुर्यजमानेन सहन्तूर्यादिवाद्यरवेषु क्रियमाणेषु माषभक्तं बलिं ष्पष्ट

पाद्यादिकमादाय मंडपांतः पूर्वदिक्संस्थे। एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश। संवीज्यमानोऽप्सरसां गणेन रक्षाध्वरं नो भगवन्न
मस्ते। इतींद्रमावाह्य इंद्राय नमः इति गंधादिभिः संपूज्य इंद्राय सपरिवाराय एष माषभक्तबलिर्नमः इति बलिं दद्यात्। एह्येहि सर्वामरहव्य
वाह मुनिप्रवीरैरभितोऽभिजुष्ट। तेजोवता लोकगणेन सार्द्धं ममाध्वरं रक्ष कवे नमस्ते इति अग्निमावाह्य। ॐ अग्नये नमः। इति प्राग्वत्सं
पूज्य बलिं दद्यात्। एवमेव दक्षिणादि दिक्षु यमादीन् वक्ष्यमाणैस्तत्तन्मंत्रैरावाह्य तत्तन्नाममंत्रैः संपूज्य प्राग्वद्बलिं दद्यात्। एह्येहि वै
वस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते। शुभाशुभानंद शुचामधीश शिवाय नः पाहि मखं नमस्ते। ॐ यमाय नमः। ३। एह्येहि रक्षोग
णनायक त्वं विशालवेतालपिशाचसंघैः ममाध्वरं पाहि शुभाधिनाथ लोकेश्वरस्त्वं भगवन्नमस्ते। ॐ निर्ऋतये नमः। ४। एह्येहि यादो
गणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः। विद्याधरेंद्रामरगीयमान पाहि मखं (?) स्मान् भगवन्नमस्ते। ॐ वरुणाय नमः। ५। एह्येहि
यज्ञे मम रक्षणाय मृगाधिरूढः सहसिद्धसंघैः। प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते। ॐ वायवे नमः। ६। एह्ये १४
हि यक्षेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धं। सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते। ॐ सोमाय नमः। ७
एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगगणेन सार्द्धं। लोकेश भूतेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते। ॐ ईशानाय नमः।

॥ इति। ततो निर्ऋतिवरुणयोर्मध्ये। एह्येहि पातालधरामरेश नागांगनाकिन्नरगीयमान। रक्षोरगेंद्रामरलोकसंघैरनंत रक्षाध्वरमस्मदीयं। ॐ
अनंताय नमः। ९। एह्येहि विश्वाधिपते मुनींद्र लोकेन सार्द्धं पितृदेवताभिः। सर्वस्य धाताह्यमितप्रभावः पाह्यध्वरं नः सततं शिवाय। ॐ ब्रह्मणे नमः
इत्यावाह्य बलिं दद्यात्। १०। ततः ईंद्रेशानयोर्मध्ये। त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च। ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि मे॥
देवदानवगंधर्वा यक्षराक्षसपन्नगाः। ऋषयो मनवो गावो देवमातर एव च। एते ममाध्वरे रक्षां कुर्वंतु मुदान्विताः। इति पठित्वा। भूतेभ्यो नमः
गंध त्यं जलेस्थितं पुष्पैर्भूतानि संपूज्य एष माषभक्तबलिर्भूतेभ्यो नमः इति मंत्रेण बलिं दद्यात्। दानसागरे तु। त्रैलोक्ये यानि भूतानि
मंत्रद्वयं पठित्वा। त्रैलोक्येभ्यः स्थावरेभ्यो भूतेभ्यो नमः। त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः। ॐ ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ शि
वाय नमः। दानवेभ्यो नमः। गंधर्वेभ्यो नमः। यक्षेभ्यो नमः। राक्षसेभ्यो नमः। पन्नगेभ्यो नमः। मनुष्येभ्यो नमः। गोभ्यो नमः। देवमातृभ्यो नमः
इत्येतैर्मंत्रैः प्रत्येकं संपूज्य प्रत्येकं बलिं दद्यात्। इत्यलं। एवं बलिदानानंतरं यजमानो गुरवे अद्येत्यादि देशकालौ स्मृत्वा कृतै
तत् अधिवासनकर्मप्रतिष्ठार्थं दक्षिणामेतानि हेमकुंडलोपवीतकटकांगुलीयानि वस्त्राणि यशेनादीनि चामुकगोत्रा
यामुकवेदामुकशाखाध्यायिने अमुकशर्मणे ब्राह्मणाय गुरवे तुभ्यमहं संप्रददे इत्युक्त्वा हेमादीनि भूषणानि चया

वंश्येकस्मै ऋत्विजे द्रव्याणि तोलादिगुणानि दद्यात्। एवं पूर्वोक्तप्रयोगे गुरुपदस्थाने ऋत्विक्पदप्रक्षेपेण ऋत्विक्स्योपि प्रत्येकं दद्यात्॥
एवमधिवासनं कृत्वा गुर्वृत्विजः सयजमाना उपोषिताः तां सर्वे तां रात्रिं तत्रैव वसेयुः। ततः सर्वे कृतस्नानादिक्रियाः मंडपमागत्य
पुण्याहवाचनानंतरं पूर्णाहुतिमंत्रं स्वस्वशाखीयं पूर्वोक्तप्रकारेणैकस्मिन् शेषं समापयेयुः। आवश्यककार्यापत्यादिना वैक
ल्ये तु सद्य एवाधिवासनं कृत्वा तद्दैवकुलापुरुषदानं कुर्यात्॥ सद्योधिवासनं वाथ कुर्याद्धि विकलो नर इति वचनादित्यलं प्राक्।
ततो वेदिपश्चिमे देशे उपविष्टं सकलत्रपुत्रयुतं यजमानं कुंभस्थापितकलशजलैर्ग्रहकलशोदकेन च स्वस्वशाखीयवै
दिकमंत्रान् निषेकपूर्वकं सुरास्त्वामभिषिंचंत्वित्यादि निर्मत्स्यपुराणोक्तैर्वक्ष्यमाणैर्मंत्रैर्यजमानं पूर्यादिमंगलजलाभिषेकाप
माने गुर्वृत्विजोऽभिषिच्य स्नपयेयुः। ते च मंत्रा यथा॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा संक
र्षणो विभुः। प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते। आखंडलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा। वरुणः पवनश्चैव धना १५
ध्यक्षस्तथा शिवः। ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु मे सदा। कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा
वपुः शांतिस्तुष्टिः शांतिश्च मातरः। एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः। आदित्यश्चंद्रमा भौमो बुधजीवसि

तार्कजाः। ग्रहास्त्वामभिषिंचंतु राहुकेतुश्च तर्पिताः। देवदानवगंधर्वयक्षराक्षसपन्नगाः। ऋषयो मनवश्चैव देवमातर एव च। देवपत्न्यो द्रु
मा नागा दैत्याश्चाप्सरसां गणाः। अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च। औषधीनि च रत्नानि कालस्यावयवाश्च ये। सरितः सा
शैलास्तीर्थानि जलदा नदाः। एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये। एवं स्नापितो यजमानः शुक्लमाल्यांबरधरः शुक्लगंधानुले
सांगस्तुलायै नम इति तुलां गंधपुष्पादिभिः संपूज्य गंधपुष्पादिकमादाय तुलादंडदेवताः प्रत्येकं पूजयेत्। यथा। ईशानाय नमः। शशिने
नमः। मारुताय नमः। रुद्राय नमः। सूर्याय नमः। विश्वकर्मणे नमः। गुरवे नमः। अंगिरोग्निभ्यां नमः। प्रजापतये नमः। विश्वेभ्यो दे
वेभ्यो नमः। विश्वधात्रे नमः। पर्जन्यशंभुभ्यां नमः। पितृभ्यो नमः। सोमाय नमः। धर्माधिपाय नमः। अमरराजाय नमः। अश्विभ्यां०
वरुणाय०। मित्रावरुणाभ्यां०। ॐ मरुद्भ्यो०। धनेशाय०। गंधर्वाय०। जलेशाय०। विष्णवे०। ततः तुलामध्ये नागस्थितं गोविंदं पूजयित्वा
गृहीतकुसुमांजलिस्तुलां त्रिः प्रदक्षिणीकृत्य वक्ष्यमाणैर्मंत्रैस्तुलामभिमंत्रयेत्। मंत्रास्तु॥ नमस्ते सर्वदेवानां शक्तिस्त्वं सत्य
माश्रिता। साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना। एकतः सर्वसत्यानि तथानृतशतानि च। धर्माधर्मकृतां मध्ये स्था
पितासि जगद्धिते। त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता। मां तोलयंती संसारादुद्धरस्व नमोनमः। योसौ तत्त्वाधिपो दे

वः पुरुषः पंचविंशकः ॥ स एवाधिष्ठितो हे विश्वयितस्मिन्नमो नमः ॥ नमो नमस्ते गोविंद तुलापुरुषसंज्ञक ॥ त्वं हरे तारयस्वास्मान्नस्मात्संसारसाग
रादिति ये निमंत्र्य तं स्नात्वा माल्यानि मंत्रांजलिस्थानि पुष्पाणि तुलायां संप्रकीर्य पुनः पुनः प्रदक्षिणीकृत्य तां भयः समीचीनां तां तुलां उत्तरभागे प्राङ्मु
खः सर्वाभरणभूषितः खड्गचर्मकवचयुतः सौवर्णं धर्मराजप्रतिमां सव्यहस्ते मुष्ट्या गृहीत्वा दक्षिणहस्ते मुष्ट्या च सौवर्णीं सूर्यप्रतिमां गृहीत्वा
[illegible]णमादायोत्तरस्यां दिशि स्थित तुलाफलके ब्राह्मणाः समारोहयेत् [illegible] कमारुह्य तुलामध्यभागे ऽवलंबितायां गोविंदप्रतिमायामुखं परस्य
न्यासीत् ततो दक्षिणतुलाफलके ब्राह्मणाः समाधिकं यथा भवति तथा त्यतिनिर्मलं सुवर्णं प्रक्षिपेयुः पुष्टिकामस्त्वेघ [illegible] मानस्तद्यावता
भूमिस्थितफलकं भवति तावत्सुवर्णं प्रक्षिपेयुः ॥ ततस्तुलायामेव क्षणमात्रं स्थित्वा ॥ नमस्ते सर्वभूतानां साक्षिभूते सनातनि ॥
पितामहेन देवि त्वं निर्मिता परमेष्ठिना ॥ त्वया धृतं जगत्सर्वं सह स्थावरजंगमं ॥ सर्वभूतादि भूतस्थे भूतधारिनमस्ते भूतधा
रिणि ॥ इति तत्पुराणोक्तं श्लोकद्वयं पठित्वा ॥ यथा पवित्रं मनुजे [illegible] मम पत्यं जातवेदसः ॥ तथा न पवित्रेण सुवर्णादि पुनातु मां ॥ यत्कृते यथाग्नि 25
देवताः सर्वास्सुवर्णं च तदात्मकं ॥ तथा स्वेन पवित्रेण सुवर्णादि पुनातु मां ॥ यत्कृतं मे स्वकायेन मनसा वचसा तथा ॥ दुःकृतं तत्सुवर्णं
[illegible]पाउ मुक्तिं परां श्रुतानि ति ॥ वह्निपुराणोक्तान् मंत्रान्पठेत् ॥ ततस्तुलाफलकादवतीर्य वेदिपश्चिमभागे आसने प्राङ्मुखः [illegible]

[illegible]श्यक प्रतिनयव कु[illegible] सुमजलान्याशय देशकालकीर्तनांते सकलबुल हत्यादि पापोपशमनपूर्वकं सर्वमन्वंतरकालावछिन्न सर्वलो
कपालस्थानाधिकरणनिवासोत्तरकालास्मारागणाधिष्ठितकरणकनककिंकिणीगणमंडितार्कसवर्णविमानकरणक वैकुंठभुवनागमना
नंतरकल्पकोटिशतावच्छिन्नतल्लोकभोगानंतरकालाखिलभूपालमौलिमाणिक्यमालोपरंजितचरणपीठत्वविशेषितराजराजत्वश्रद्धा
नुविद्धयशः सहस्रयाजित्वप्रदीप्तप्रतापानलाशेषमहीपालविजयकामः अमुकगोत्रायामुकवेदशर्मणे ब्राह्मणाय गुरवे अमुकशर्मादि
नितदुपकल्पितोपकरणालंकारसहितमिदं तुलितसुवर्णस्यार्द्धं तुभ्यं संप्रददे न मम इति अमुखो विष्णुगुरोर्हस्ते कुशयवतिलजलानि दद्यात् ॥
गुरु श्रीउं स्व[illegible]स्तीत्युक्त्वा स्वकीयं सुवर्णभागं स्व[illegible] देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति पवित्रे
णायजुषा प्रतिगृह्य कोवादित्यादिकं कामस्तुतिं पठेत् ॥ [illegible] ततः [illegible] तुलापुरुषमहादानप्रतिष्ठा[illegible]र्थं अमुकंग्राममदक्षि
णार्थे परिकल्पितमेतत्काएकजातीयरत्नसहस्रार्द्धलक्ष[illegible] सहस्रपरिमितसुवर्णार्द्धं वा दक्षिणाममुकगोत्रायेत्यादिना गुरवे
[illegible]यमहं संप्रददे दद्यात् ॥ एवमपरमर्द्धं च ऋत्विग्भ्यो दक्षिणां दद्यात् ॥ इति हेमाद्रिकारानिमतो दक्षिणादानप्रयोगः ॥ ॥ विभवानुसारेणाथ मस्त
सुवर्णं निदद्यादित्यन्ये वा पक्षाः ॥ अस्मिंश्च तुलितसुवर्णस्य द्वैधाविभाग पक्षे प्रधान पक्षे [illegible] ज्ञापक वा रपाने स्मृतुलापुरुषद्रव्यस्य समा

सत्वान्ततोन्यदेव द्रव्यं पर्याप्तं किंचिद्दक्षिणां दद्यात्। गुर्वतिक्रमे तु द्व्यंशात्ततोन्येभ्योपि दातव्यमिति द्वितीयपक्षाश्रयणे तुलापुरुषद्रव्यं त्रेधा वि
भज्यैकं भागमाचार्याय अपरं भागमृत्विग्भ्यः। तृतीयं भागं जापकद्वारपालादिभ्यो न्येभ्यश्च ब्राह्मणेभ्यो दद्यात्। पूर्वोक्तप्रयोग
ममुककाम इत्यंतमुच्चार्य एतदुपकल्पितोपकरणादियुक्तमेतत्तुलीकृतसुवर्णतृतीयांशं अमुकगोत्रेत्याद्युक्त्वा गुरवे तुभ्यं संप्रददे
इत्येकमंशं गुरवे दद्यात्। ततः पूर्वोक्त एव वाक्ये एतत्तुलितसुवर्णतृतीयांशं अमुकगोत्रेभ्यो ब्राह्मणातिरिक्तेभ्यो वः संप्रददे इति दद्या
त्। ते च स्वस्वीकृतांशं स्वस्वमंशं देवस्य त्वेत्यादिना सावित्रेण यजुषा प्रतिगृह्य कोदादिति मंत्रं पठेयुः। ऋत्विग्भ्यश्चान्येभ्यश्च यथाना
मगोत्रेभ्यो ब्राह्मणेभ्यः स्वाभिमतगुर्वाद्यंशीकृतभागव्यवस्थया ग्रामादि युष्मभ्यमहं संप्रददे इति गुर्वादीन् हस्ते जलं निनयेत्। ऋत्विजो
ग्रामरत्नादिदानेन संतोष्य तदनुज्ञयाऽन्येभ्यो इत्याद्युक्त्वा जापकद्वारपालेभ्योन्येभ्यश्च ब्राह्मणेभ्यो दीनानाथविशिष्टेभ्योपि देयमिति।
तृतीयपक्षाश्रयणे तु एकेनैव वाक्येन दद्यात्। तद्यथा। पूर्वोक्तप्रयोगे अमुकामुककाम इत्येतदनंतरं एतदुपकल्पितोपकरणादियुक्तमे ११
तत्तुलितसुवर्णममुकशर्मणे ब्राह्मणाय तुभ्यं गुरवे अमुकामुकशाखाध्यायिभ्यो अमुकामुकशर्मभ्यो ऋत्विग्भ्यो अमुकामु
कगोत्रेभ्य इत्याद्युक्त्वा जापकद्वारपालकेभ्यो न्येभ्यश्च ब्राह्मणेभ्यो दीनानाथविशिष्टेभ्यो ब्राह्मणातिरिक्तेभ्यश्च युष्मदसु

भ्यमहमिमत्भागव्यवस्थया संप्रददे इति गुर्वादिहस्ते सुदद्यात्। ते च स्वस्वांशं स्वीकृत्य पूर्ववत्प्रतिगृह्णीयुः। ततो दक्षिणां दद्यात्। अनयो
तीयतृतीयपक्षयोर्दानप्रतिष्ठार्थं दक्षिणादानं गुर्वृत्विग्भ्य एव नान्येभ्यः। ततः पूर्ववत्सुवर्णपात्रे वा चतं कारयित्वा पूजोपकरणानि गृहीत्वा
देवेभ्यः पूर्ववद्गृहादीनां पूजनं यजमानः कुर्यात्। ततो गुरुः पूजां गृहीत्वा तु देवगणाः सर्वे पूजामादाय पार्थिवीं। इष्टकामप्रसिद्ध्यर्थं पुनरा
गमनाय चेति देवता विसर्जयेत्। संकल्पितं सुवर्णं चिरं गृहे न धारयेत्। शीघ्रं ब्राह्मणेभ्यो दद्यात्॥ ॥इति तुलापुरुषमहादानप्रयोगः॥
अथ तत्र विशेषोन्तरेषु यादि तुलापुरुषदानविधिः। तत्रान्यविशेषोन्तरे॥ ॥अनेनैव विधानेन किंरु समयं पुनः। कर्तव्येणतथैषछंतिकेचिद्बु
धपुंगवाः। अनेन विधितानेन पूर्वोक्तसुवर्णतुलापुरुषविधिना। तत्र मत्स्यपुराणीयेन समनंतरोक्तेन तुलापुरुषविधिना समानार्थमि
ति। तत्र त्या एव धर्मनिबन्धाः। तथा सितत्तृतीयायां तार्ष्यैः सौभाग्यदर्पिताः। कुंकुमेन प्रयच्छंति लवणेन गुडेन वा। तत्र मंत्रान् होमो वा एव मे
वप्रदापयेत्। विश्वामित्रः। आदित्येराकुराकुलग्रस्ते सुवर्णैस्तोलयेत्तनुं। सोमभय्यहेतु रूप्ये स्पर्णं यथाज्ञानं तथाश्रूणु। प्रवर्ग्यस्य मु
नुखेयुक्तत्सत्रःयत्रहेरतः। सर्वपापहरायेनद्दानि प्रीयतां विभुः। इत्यकद्वार्थजजंतमुनिक्षिपे प्रिज सत्तम। प्राणंति पितरं कांसे
ताग्रेनैवपितामहः। लवणेभिः सिंधुजेलन्ना प्रीयेते पार्वती गुडे। गंधैर्गुडे र्वा वासोभिः सोभाग्यै लवणे परं। प्रीयती विश्वधात्री

मिदानमंत्रोविधीयते॥ तुलापुरुषनोराजन्यातितत्परमंपदं॥ सर्वपापविशुद्धात्मामुक्तिंयात्यपुनर्भवेत्॥ हत्वायैतुब्राह्मणान्न्मन्त्रो
नयेदात्मनस्तनुं॥ सुवर्णेनात्मतुल्येनब्रह्महत्यांव्यपोहति॥ अत्रानुक्तदक्षिणेषुसामान्यतोविहितेसुवर्णसुवर्णादधिकंयथाशक्ति
दक्षिणात्वेनदेयं॥ ॥इतिरूप्यादितुलापुरुषदानविधिः॥ अथस्कंदपुराणोक्तोजोद्धृततुलापुरुषदानविधिः॥ आत्मानंतो
लयित्वातुदद्याद्योहंचतस्समेद्विजाय